শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৭৬

উদ্ধৱদূত্যৱৰ্ণনম্

গত্বা সান্দীপনিমথ চতুষষষ্টিমাত্ৰৈরহোভিঃ
সৰ্ৱজ্ঞস্তৱং সহ মুসলিনা সৰ্ৱৱিদ্যা গৃহীত্বা।
পুত্ৰং নষ্টং যমনিলযনাদাহৃতং দক্ষিণাৰ্থং
দত্বা তস্মৈ নিজপুরমগা নাদযন্ পাঞ্চজন্যম্॥ ১ ॥

স্মৃত্বা স্মৃত্বা পশুপসুদৃশঃ প্ৰেমভারপ্ৰণুন্নাঃ
কারুণ্যেন ত্বমপি ৱিৱশঃ প্ৰাহিণোরুদ্ধৱং তম্।
কিঞ্চামুষ্মৈ পরমসুহৃদে ভক্তৱৰ্যায তাসাং
ভক্ত্যুদ্ৰেকং সকলভুৱনে দুৰ্লভং দৰ্শযিষ্যন্॥ ২ ॥

ত্বন্মাহাত্ম্যপ্ৰথিমপিশুনং গোকুলং প্ৰাপ্য সাযং
ত্বদ্বাৰ্তাভিৰ্বহু স রমযামাস নন্দং যশোদাম্।
প্ৰাতৰ্দৃষ্ট্ৱা মণিমযরথং শঙ্কিতাঃ পঙ্কজাক্ষ্যঃ
শ্ৰুত্বা প্ৰাপ্তং ভৱদনুচরং ত্যক্তকাৰ্যাঃ সমীযুঃ॥ ৩ ॥

দৃষ্ট্ৱা চৈনং ত্বদুপমলসদ্বেষভূষাভিরামং
স্মৃত্বা স্মৃত্বা তৱ ৱিলসিতান্যুচ্চকৈস্তানি তানি।
রুদ্ধালাপাঃ কথমপি পুনৰ্গদ্গদাং ৱাচমূচুঃ
সৌজন্যাদীন্ নিজপরভিদামপ্যলং ৱিস্মরন্ত্যঃ॥ ৪ ॥

শ্ৰীমন্ কিং ত্বং পিতৃজনকৃতে প্ৰেষিতো নিৰ্দযেন
ক্ৱাসৌ কান্তো নগরসুদৃশাং হা হরে নাথ পাযাঃ।
আশ্লেষাণামমৃতৱপুষো হন্ত তে চুম্বনানা-
মুন্মাদানাং কুহকৱচসাং ৱিস্মরেত্ কান্ত কা ৱা॥ ৫ ॥

রাসক্রীডালুলিতললিতং ৰিশ্লথতকেশপাশং
মন্দোদভিন্নশ্ৰমজলকণং লোভনীযং ত্বদঙ্গম্।
কারুণ্যাব্ধে সকৃদপি সমালিঙ্গিতুং দর্শযেতি
প্রেমোন্মাদাদ্ভুৱনমদন ত্বতপ্রিযাস্তৱাং ৰিলেপুঃ॥ ৬ ॥

এৱম্প্রাযৈর্ৰিৱশৱচনৈরাকুলা গোপিকাস্তা-
স্তৱতসন্দেশৈঃ প্রকৃতিমনযত্ সোথ ৰিজ্ঞানগর্ভৈঃ।
ভূযস্তাভির্মুদিতমতিভিস্তৱন্মযীভির্ৱধূভি-
স্তত্তদ্বার্তাসরসমনযত্ কানিচিদ্বাসরাণি॥ ৭ ॥

ত্বতপ্রোদ্গানৈঃ সহিতমনিশং সর্ৱতো গেহকৃত্যং
ত্বদ্বার্তৈৱ প্রসরতি মিথঃ সৈৱ চোতস্বাপলাপাঃ।
চেষ্টাঃ প্রাযস্তৱদনুকৃতযস্তৱন্মযং সর্ৱমেৱং
দৃষ্টৱা তত্র ৱ্যমুহদধিকং ৰিস্মযাদুদ্ধৱোযম্॥ ৮ ॥

রাধাযা মে প্রিযতমমিদং মতপ্রিযৈৱং ব্রৱীতি
ত্বং কিং মৌনং কলযসি সখে মানিনী মতপ্রিযেৱ।
ইত্যাদ্যেৱ প্রৱদতি সখি ত্বতপ্রিযো নির্জনে মা-
মিত্থংৱাদৈররমযদযং ত্বতপ্রিযামুতপলাক্ষীম্॥ ৯ ॥

এষ্যামি দ্রাগনুপগমনং কেৱলং কার্যভারা-
দ্বিশ্লেষেপি স্মরণদৃঢতাসম্ভৱান্মাস্তু খেদঃ।
ব্রহ্মানন্দে মিলতি নচিরাত্ সঙ্গমো ৱা ৰিযোগ-
স্তুল্যো ৱঃ স্যাদিতি তৱ গিরা সোকরোন্নির্ৱ্যথাস্তাঃ॥ ১০ ॥

এৱং ভক্তিঃ সকলভুৱনে নেক্ষিতা ন শ্রুতা ৱা
কিং শাস্ত্রৌঘৈঃ কিমিহ তপসা গোপিকাভ্যো নমোস্তু।
ইত্যানন্দাকুলমুপগতং গোকুলাদুদ্ধৱং তং
দৃষ্টৱা হৃষ্টো গুরুপুরপতে পাহি মামামযৌঘাত্॥ ১১ ॥

**********

www.prapatti.com